ॐ

श्री लक्ष्मीनृसिंह परब्रह्मणे नमः।

श्री पद्मावती समेत वेङ्कटेशाय नमः।

श्री विष्णवे परमात्मने नमः।

श्रीमते रामानुजाय नमः।

श्री निगमान्त महा देशिकाय नमः।

श्री सायिराम्।

# दर्श श्राद्धम् -- अमावास्या तर्पणम्

Introductory comments:

*shraaddhaa* is the performance of prescribed rituals in memory of parents who have passed on to the Spiritual Dimension. *shraaddhaa* means - an act performed with *shraddhaa* (care, devotion, love and respect). *pratyaabdiika shraaddhaa* is the anniversary, performed on the day of the Annual *tithi* to a parent, be it a father or mother who is no longer alive.

In addition to *pratyaabdiika shraaddha*, one has to perform *shraaddhaa* on *amaavaasyaa thithi* every month, if the father is not alive. These *shraaddhaas* are called *darsha shraaddhaa* or more commonly *tarpaNa*. Given below is the procedure for *amaavaasyaa tarpaNa*.

*amaavaasyaa tarpaNa* is to be performed for three generations of parents on the father's side (*pitR^i, pitaamaha,* and *prapitaamaha* with corresponding *patni swaruupaas*) and three generations of grand-parents on the mother's side (*maataamaha, maatuHpitaamaha,* and *maatuHprapitaamaha* with corresponding *patni swaruupaas*). The spiritual postions (*swaruupas*) assumed by the three generations are *vasu*, *rudra*, and *aaditya*, for males and *vasu patnii*, *rudra patnii*, and *aaditya patnii* for the spouses. If any one in this hierarchy is alive, the next person higher in the lineage takes that spiritual place (*sthaana*) and is substituted.

*tarpaNa* for grand-parents on mother's side is **not** to be performed if maternal grand-father is alive.

*tarpaNa* is also to be performed on the first day of the months, *meshha (meshha sankramaNa puNya kaala), kaTaka (kaTaka sankramaNa puNya kaala), tula (tula sankramaNa puNya kaala),* and *makara (makara sankramaNa puNya kaala).*

There are two other *tarpaNaas* to be performed - *mahaaLaya tarpaNa* done during the *mahaaLaya paksha* which falls during *simha and kanyaa* months, and *parehaNi tarpaNa* done on the day following the annual ceremony.

The procedure for *amaavaasya tarpaNa* is given below. *maasa sankramaNa tarpaNa*(s) are done similarly with some changes to the *saN^kalpa*. These changes are indicated in parentheses.

All religious *samskaraas* require initial guidance before one can use written texts for performing the rituals independently. Please seek the guidance of someone who performs tarpaNaas regularly and follow the text herein.

# आचमनम् - प्राणायामः - संकल्पः

## आचमनम्

अच्युताय नमः

अनन्ताय नमः

गोविन्दाय नमः

केशवाय नमः - नारायणाय नमः

माधवाय नमः - गोविन्दाय नमः

विष्णवे नमः - मधुसूदनाय नमः

त्रिविक्रमाय नमः - वामनाय नमः

श्रीधराय नमः - हृषीकेशाय नमः

पद्मनाभाय नमः - दामोदराय नमः

## प्राणायामः

ओं भूः

ओं भुवः

ओं सुवः

ओं महः

ओं जनः

ओं तपः

ओ३ सत्यम्

ओं तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियो यो नः प्रचोदयात्

ओमापो ज्योतिरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम्

## गुरु इष्टदैव प्रार्थना

Hold the palms in praNaama posture.

अस्मद्गुरुभ्यो नमः।

अस्मत्परम गुरुभ्यो नमः।

अस्मत्सर्व गुरुभ्यो नमः।

श्रीमते श्री आदिवण् शठकोप यतीन्द्र महा देशिकाय नमः।

यस्याभवद्भक्त जनार्तिहन्तुः पितृत्वमन्येष्वविचार्य तूर्णम्।
स्तम्भेऽवतारस्तमनन्यलभ्यं लक्ष्मी नृसिंहं शरणं प्रपद्ये॥

श्रीमान् वेङ्कट नाथार्यः कवितार्किक केसरी।
वेदान्ता चार्य वर्योमे सन्निधत्तां सदाहृदि॥

गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहे।
वृणीमहे च तत्राद्यौ दम्पती जगतां पती॥

श्रीमन्नभीष्ठ वरद।
त्वामस्मि शरणं गतः॥

स्वशेष भूतेन मया स्वीयैः सर्व परिच्छदैः।
विधातुं प्रीतमात्मानं देवः प्रक्रमते स्वयम्।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशान्तये॥

यस्य द्विरद वक्त्राद्याः पारिषद्याः परःशतम्।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये॥

All pitR^i kaaryaas are done with yaGYnopaviitam in praachiinaaviita position, normally facing South. If facing South is not possible, the next choice is to face East.
Wear the yaGYnopaviitam in praachiinaaviita position.
Hold the palms in the sa.nkalpa posture.

**संकल्पः**

हरिः ओं तत् सत् श्रीगोविन्द गोविन्द गोविन्द

अस्य श्री भगवतो महा पुरुषस्य

विष्णोराज्ञया

प्रवर्तमानस्य आद्य ब्रह्मणो

द्वितीय परार्धे

श्री श्वेतवराह कल्पे वैवस्वत मन्वन्तरे

कलियुगे प्रथम पादे अस्मिन् वर्तमानानां व्यावहारिकाणां

प्रभवादीनां षष्ट्याः संवत्सराणां मध्ये

------ नाम संवत्सरे ------ अयने ------ ऋतौ ------ मासे

कृष्ण पक्षे ॥------ पक्षे ॥

अमावास्यां पुण्य तिथौ ॥------ पुण्य तिथौ ॥

--- वासर --- नक्षत्र युक्तायां

श्रीविष्णुयोग विष्णुकरण

एवं गुण विशेषण विशिष्टायां अस्यां

अमावास्यां पुण्य तिथौ ॥------ पुण्य तिथौ ॥

श्री भगवदाज्ञया श्रीमन्नारायण प्रीत्यर्थं

--- गोत्राणाम् --- --- --- शर्मणां वसुरुद्रादित्य स्वरूपाणां

अस्मत् पितृ पितामह प्रपितामहानां सपत्नीकानां

--- गोत्राणाम् --- --- --- शर्मणां वसुरुद्रादित्य स्वरूपाणां

अस्मत् मातामह मातुःपितामह मातुःप्रपितामहानां सपत्नीकानां

वर्गद्वयपितॄन् उद्दिश्य वर्गद्वयपितॄणां अक्षय्यतृप्त्यर्थं

अमावास्यापुण्यकाले ॥-----सङ्क्रमण पुण्यकाले ॥

दर्शश्राद्धं ॥-----सङ्क्रमण पुण्यकाल श्राद्धं ॥

तिलतर्पण रूपेण करिष्ये

Return the yaGYnopaviitam to upaviita position, face West, and hold the palms in praNaama posture.

## सात्विक त्यागः

ओं भगवानेव

स्वनियाम्य स्वरूपस्थिति प्रवृत्ति

स्वशेषतैकरसेन अनेन आत्मना कर्त्रा

स्वकीयैश्चोपकरणैः स्वाराधनैक प्रयोजनाय

परम पुरुषः सर्वशेषी श्रियःपतिः

स्वशेष भूतमिदं

दर्शश्राद्धाख्यं कर्म ॥-----सङ्क्रमण पुण्यकाल श्राद्धाख्यं कर्म ॥

भगवान् स्वस्मै स्वप्रीतये

स्वयमेव कारयति ॥

---

## पितृ मातृ वर्ग आवाहनम् - आसनम् - अर्चनम्

Wear the yaGYnopaviitam in praachiinaaviita position.

## प्रोक्षण मन्त्रः

अपहता असुरा रक्षाꣳसि पिशाचा ये क्षयन्ति पृथिवीमनु

अन्यत्रेतो गच्छन्तु यत्रैषां गतं मनः ॥

उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः

असुं य ईयुरवृका ऋतज्ञास्तेनोऽवन्तु पितरो हवेषु ॥

अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा

यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

ओं भूर्भुवःसुवो भूर्भुवःसुवो भूर्भुवःसुवः ॥




saying the above mantra, sprinkle tila (sesame seeds) over the place where the darbhaas will be placed for tarpaNam.
arrange two rows of straight darbhaas in East-West orientation for the base, as shown in the sketch. Of the four bhugnaas, take only two and lay one single bhugnaa on the left (assuming you are facing South) and another on the right, a short distance apart, with the bhugna tips facing South. The bhugna on the left is for pitR^i varga and that on the right (Western side) is for maatR^i varga.
Put aside the other two bhugnaas for now.

## पितृ वर्ग आवाहनम्

आयात पितरः सोम्या गम्भीरैः पथिभिः पूर्व्यैः प्रजामस्मभ्यं

ददतो रयिं च दीर्घायुत्वं च शतशारदं च ॥

--- गोत्रान् --- --- --- शर्मणः वसुरुद्रादित्यस्वरूपान्

अस्मत् पितृ - पितामह - प्रपितामहान्

--- गोत्राः --- --- --- नाम्नीः

अस्मत् मातृ - पितामहि - प्रपितामहींश्च आवाहयामि ॥

sprinkle a few tila (sesame seeds) on the pitR^i varga bhugna.

## आसनं

सकृदाच्छिन्नं बर्हिरूर्णा मृदु स्योनं पितृभ्यस्त्वाभराम्यहम्

अस्मिन्थ्सीदन्तु मे पितरः सोम्याः पितामहाः प्रपितामहाश्चानुगैः सह ॥

--- गोत्राणाम् --- --- --- शर्मणां वसुरुद्रादित्य स्वरूपाणां

अस्मत् पितृ पितामह प्रपितामहानां

--- गोत्राः --- --- --- नाम्नीनाम्

अस्मत् मातुः पितामहि प्रपितामहीनां च इदमासनम् ॥

Take one of the bhugnaas which was laid aside, and offer it as aasana to the pitR^i varga making it a pair of bhugnaas as shown in the sketch.

## अर्चनं

इदमर्चनम्

sprinkle a few tila (sesame seeds) on the pitR^i varga bhugnas.

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं

परिस्रुतꣴस्वधास्थ तर्पयत मे अस्मत् पितृन् ॥

Offer water with tila to the pitR^i varga bhugnaas.

## मातृवर्ग आवाहनं

आयात मातुःपितरः सोम्या गम्भीरैः पथिभिः पूर्व्यैः

प्रजामस्मभ्यं ददतो रयिं च दीर्घायुत्वं च शतशारदं च ॥

--- गोत्रान् --- --- --- शर्मणः वसुरुद्रादित्यस्वरूपान्

अस्मत् मातामह - मातुःपितामह - मातुःप्रपितामहान्

--- गोत्राः--- --- ---नाम्नीः

अस्मत् मातामहि - मातुःपितामहि - मातुःप्रपितामहींश्च आवाहयामि ॥

sprinkle a few tila (sesame seeds) on the maatR^i varga bhugna.

## आसनं

सकृदाच्छिन्नं बर्हिरूर्णा मृदु स्योनं पितृभ्यस्त्वाभराम्यहम्

अस्मिन्थ्सीदन्तु मे पितरः सोम्याः पितामहाः प्रपितामहाश्चानुगैः सह ॥

--- गोत्राणाम् --- --- --- शर्मणां  वसुरुद्रादित्य स्वरूपाणां

अस्मत् मातामह मातुःपितामह  मातुःप्रपितामहानां

--- गोत्राः --- --- --- नाम्नीनाम्

अस्मत् मातामहि मातुःपितामहि मातुःप्रपितामहीनां च इदमासनम् ॥

Take the other bhugnaa which was laid aside, and offer it as aasana to the maatR^i varga making it a pair of bhugnaas. The final arrangement should now look like it is shown in the sketch.

## अर्चनं

इदमर्चनम्

sprinkle a few tila (sesame seeds) on the maatR^i varga bhugnas.

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं

परिस्रुतᳬस्वधास्थ तर्पयत मे अस्मत् मातुःपितॄन् ॥

Offer water with tila to the maatR^i varga bhugnaas.

## पितृवर्ग तर्पणम्

Offer water with tila to the pitR^i varga bhugnaas after uttering the following mantraas (one offering after each svadhaanamastarpayaami, for a total of three offerings after each mantraa)

### पितुः

उदीरतां अवर उत्परासः उन्मध्यमाः पितरस्सोम्यासः ।
असुँय ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥
--- गोत्रान् --- शर्मणः वसुरूपान् अस्मत् पितृन्
स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि ॥

अङ्गिरसो नः पितरोनवग्वा अथर्वाणो भृगवस्सोम्यासः
तेषां वयꣳसुमतौ यज्ञियानां अपि भद्रे सौमनसे स्याम ॥
--- गोत्रान् --- शर्मणः वसुरूपान् अस्मत् पितृन्
स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि ॥

आयन्तु नः पितरोमनोजवसः अग्निष्वात्ताः पथिभिर्देवयानैः
अस्मिन् यज्ञे स्वधया मदन्तु अधिब्रुवन्तु ते अवन्त्वस्मान् ॥
--- गोत्रान् --- शर्मणः वसुरूपान् अस्मत् पितृन्
स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि ॥

**पितामहः**

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं
परिस्रुतꣳस्वधा स्थ तर्पयत मे अस्मत् पितॄन्॥
--- गोत्रान् --- शर्मणः रुद्ररूपान् अस्मत् पितामहान्
स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि॥

पितृभ्यः स्वधाविभ्यः स्वधा नमः
पितामहेभ्यः स्वधाविभ्यः स्वधा नमः
प्रपिता महेभ्यः स्वधाविभ्यः स्वधा नमः
अक्षन् पितरः॥
--- गोत्रान् --- शर्मणः रुद्ररूपान् अस्मत् पितामहान्
स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि॥

ये चेह पितरो ये च नेह याꣳश्च विद्म याꣳउच न प्रविद्म
अग्ने तान् वेत्थ यदि ते जातवेदस्तया प्रत्तꣳस्वधया मदन्तु ॥
--- गोत्रान् --- शर्मणः रुद्ररूपान् अस्मत् पितामहान्
स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि॥

**प्रपितामहः**

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः
माध्वीर्नस्सन्त्वोषधीः॥
--- गोत्रान् --- शर्मणः आदित्यरूपान् अस्मत् प्रपितामहान्
स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि॥

मधु नक्तमुतोषसि मधुमत्पार्थिवꣳरजः
मधु द्यौरस्तु नः पिता॥
--- गोत्रान् --- शर्मणः आदित्यरूपान् अस्मत् प्रपितामहान्
स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि॥

मधुमान्नो वनस्पतिः मधुमा॑ऽअस्तु सूर्यः

माध्वीर्गावो भवन्तु नः ॥

--- गोत्रान् --- शर्मणः आदित्यरूपान् अस्मत् प्रपितामहान्

स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि ॥

### मातुः

--- गोत्राः --- नाम्नीः वसुपत्नी रुपिणी अस्मत् मातृः

स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि ॥

### पितामही

--- गोत्राः --- नाम्नीः रुद्रपत्नी रुपिणी अस्मत् पितामहीः

स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि ॥

### प्रपितामही

--- गोत्राः --- नाम्नीः आदित्यपत्नी रुपिणी अस्मत् प्रपितामहीः

स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि ॥

### पितृवर्ग ज्ञाती तर्पणम्

ज्ञाताज्ञात पितॄन्

स्वधा नमस्तर्पयामि । स्वधा नमस्तर्पयामि । स्वधा नमस्तर्पयामि ॥

ज्ञाताज्ञात पितृपत्नीः

स्वधा नमस्तर्पयामि । स्वधा नमस्तर्पयामि । स्वधा नमस्तर्पयामि ॥

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं

परिस्रुत॑स्वधास्थ तर्पयत मे अस्मत् पितॄन् ॥

Offer water with tila to the pitR^i varga bhugnaas.

तृप्यत । तृप्यत । तृप्यत ॥

Sprinkle tila (sesame seeds) on the pitR^i varga bhugnaas.

---

## मातृवर्ग तर्पणम्

Offer water with tila to the maatR^i varga bhugnaas after uttering the following mantraas (one offering after each svadhaanamastarpayaami, for a total of three offerings after each mantraa)

### मातामहः

उदीरतां अवर उत्परासः उन्मध्यमाः पितरस्सोम्यासः।
असुँय ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु॥
--- गोत्रान् --- शर्मणः वसुरूपान् अस्मत् मातामहान्
स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि॥

अङ्गिरसो नः पितरोनवग्वा अथर्वाणो भृगवस्सोम्यासः
तेषां वयꣳसुमतौ यज्ञियानां अपि भद्रे सौमनसे स्याम॥
--- गोत्रान् --- शर्मणः वसुरूपान् अस्मत् मातामहान्
स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि॥

आयन्तु नः मातुःपितरोमनोजवसः अग्निष्वात्ताः पथिभिर्देवयानैः
अस्मिन् यज्ञे स्वधया मदन्तु अधिब्रुवन्तु ते अवन्त्वस्मान्॥
--- गोत्रान् --- शर्मणः वसुरूपान् अस्मत् मातामहान्
स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि॥

**मातुःपितामहः**

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं
परिस्रुतꣳस्वधा स्थ तर्पयत मे अस्मत् मातुःपितॄन्॥
--- गोत्रान् --- शर्मणः रुद्ररूपान् अस्मत् मातुः पितामहान्
स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि॥

मातुःपितृभ्यः स्वधाविभ्यः स्वधा नमः
मातुःपितामहेभ्यः स्वधाविभ्यः स्वधा नमः
मातुःप्रपिता महेभ्यः स्वधाविभ्यः स्वधा नमः
अक्षन् मातुःपितरः॥
--- गोत्रान् --- शर्मणः रुद्ररूपान् अस्मत् मातुः पितामहान्
स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि॥

ये चेह मातुःपितरो ये च नेह याꣳश्च विद्म याꣳउच न प्रविद्म
अग्ने तान् वेत्थ यदि ते जातवेदस्तया प्रत्तꣳस्वधया मदन्तु ॥
--- गोत्रान् --- शर्मणः रुद्ररूपान् अस्मत् मातुः पितामहान्
स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि॥

**मातुःप्रपितामहः**

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः
माध्वीर्नस्सन्त्वोषधीः॥
--- गोत्रान् --- शर्मणः आदित्यरूपान् अस्मत् मातुः प्रपितामहान्
स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि॥

मधु नक्तमुतोषसि मधुमत्पार्थिवꣳरजः
मधु द्यौरस्तु नः पिता॥
--- गोत्रान् --- शर्मणः आदित्यरूपान् अस्मत् मातुः प्रपितामहान्
स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि। स्वधानमस्तर्पयामि॥

मधुमान्नो वनस्पतिः मधुमा२ँअस्तु सूर्यः

माध्वीर्गावो भवन्तु नः ॥

--- गोत्रान् --- शर्मणः आदित्यरूपान् अस्मत् मातुः प्रपितामहान्

स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि ॥

**मातामही**

--- गोत्राः --- नाम्नीः वसुपत्नी रुपिणी अस्मत् मातामहीः

स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि ॥

**मातुःपितामही**

--- गोत्राः --- नाम्नीः रुद्रपत्नी रुपिणी अस्मत् मातुःपितामहीः

स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि ॥

**मातुःप्रपितामही**

--- गोत्राः --- नाम्नीः आदित्यपत्नी रुपिणी अस्मत् मातुःप्रपितामहीः

स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि ॥

**मातृवर्ग ज्ञाती तर्पणम्**

ज्ञाताज्ञात मातुःपितृन्

स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि ॥

ज्ञाताज्ञात मातुःपितृपत्नीः

स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि । स्वधानमस्तर्पयामि ॥

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं

परिस्रुतः२ँस्वधास्थ तर्पयत मे अस्मत् मातुःपितृन् ॥

Offer water with tila to the maatR^i varga bhugnaas.

तृप्यत । तृप्यत । तृप्यत ॥

Sprinkle tila (sesame seeds) on the maatR^i varga bhugnaas.

## उपस्थानम्

With palms joined, in praNaama posture:

नमो वः पितरो रसाय

नमो वः पितरश्शुष्माय

नमो वः पितरो जीवाय

नमो वः पितरस्स्वधायै

नमो वः पितरो मन्यवे

नमो वः पितरो घोराय

पितरो नमो वः

य एतस्मिँल्लोके स्थ युष्मा॑स्तेऽनु

येऽस्मिँल्लोके मां तेऽनु

य एतस्मिल्लोके स्थ यूयं तेषां वसिष्ठा भूयास्त

येऽस्मिँल्लोके अहँ तेषां वसिष्ठो भूयासम्॥

## उपवीति - प्रदक्षिणं - नमस्कारं - अभिवादनम्

Return the yoGYopaviitam.h to upaviitii position, perform pradakshiNa of the bhugnaas, (if the locations does not so permit, perform aatma- pradakshiNa) while chanting the following mantraas.

वाजे वाजेऽवत वाजिनो नो धनेषु विप्रामृता ऋतज्ञाः

अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः॥

देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च

नमः स्वधायै स्वाहायै नित्यमेव नमो नमः॥

Perform saashhTaanga namaskaara (if not possible, suukshma namaskaara) and offer abhivaadana

अभिवादये ------ ------- -------- ऋषेय प्रवरान्वित ------- गोत्रः

------- सूत्रः -------- श्शाखाध्यायी --------- शर्मा नामाहं अस्मिभोः।

wear the yaGYopaviitaM in the praachiinaaviiti position

## यथास्थानं प्रतिष्ठापनम्

Sprinkle tila (sesame seeds) on the pitR^i varga bhugnaas while chanting the following.

--- गोत्रान् --- --- --- शर्मणः वसुरुद्रादित्य स्वरूपान् अस्मत्

पितृ - पितामह - प्रपितामहान्

मातृ - पितामही - प्रपितामहीश्च

यथासुखं यथास्तानं प्रतिष्ठापयामि ॥

Sprinkle tila (sesame seeds) on the maatR^i varga bhugnaas while chanting the following.

--- गोत्रान् --- --- --- शर्मणः वसुरुद्रादित्य स्वरूपान् अस्मत्

मातामह - मातुःपितामह - मातुःप्रपितामहान्

मातामही - मातुःपितामही - मातुःप्रपितामहीश्च

यथासुखं यथास्तानं प्रतिष्ठापयामि ॥

Untie the bhugnaas and pavitram.h, take all the darbhas in the right hand along with the left over tila. Pouring tiirtha on to the right hand, chant the following and gently place the darbha with tila on the spot where the tarpanam.h was performed.

येषां न पिता न भ्राता न बन्धुर्नचान्य गोत्रिणः

ते तृप्तिमखिला यान्तु मया दत्तैः कुशैस्तिलैः ॥

तृप्यत । तृप्यत । तृप्यत ॥

Return the yaGYopaviitaM to the upaviitii position

## आचमनम्

अच्युताय नमः । अनन्ताय नमः । गोविन्दाय नमः । -- -- -- --

**सात्विक त्यागः**

ओं भगवानेव

अमावास्य पुण्यकाल दर्शश्राद्धाख्यं कर्म

॥-----सङ्क्रमण पुण्यकाल श्राद्धाख्यं कर्म ॥

भगवान् स्वस्मै स्वप्रीतये स्वयमेव कारितवान्

अनेन प्रीयतां श्री वासुदेवः

कायेनवाचा मनसेन्द्रियैर्वा बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात्।

करोमि यद्यत्सकलं परस्मै श्रीमन्नारायणायेति समर्पयामि ॥

॥ सर्वं श्री कृष्णार्पणमस्तु ॥

---

discard the dharba to a place where it is not likely to be trampled under anyone’s feet.

**********



Hosted by tripod